श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये चत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये चत्वारिंशं दशकम् ॥

## पूतनामोक्षवर्णनम्

तदनु नन्दममन्दशुभास्पदं
  नृपपुरीं करदानकृते गतम्।
समवलोक्य जगाद भवत्पिता
  विदितकंससहायजनोद्यमः ॥ 40.1 ॥

अयि सखे तव बालकजन्म मां
  सुखयतेऽद्य निजात्मजजन्मवत्।
इति भवत्पितृतां व्रजनायके
  समधिरोप्य शशंस तमादरात् ॥ 40.2 ॥

इह च सन्त्यनिमित्तशतानि ते
  कटकसीम्नि ततो लघु गम्यताम्।
इति च तद्वचसा व्रजनायको
  भवदपायभिया द्रुतमाययौ ॥ 40.3 ॥

अवसरे खलु तत्र च काचन
  व्रजपदे मधुराकृतिरङ्गना।
तरलषट्पदलालितकुन्तला
  कपटपोतक ते निकटं गता ॥ 40.4 ॥

सपदि सा हृतबालकचेतना
  निशिचरान्वयजा किल पूतना।

व्रजवधूष्विह केयमिति क्षणं
    विमृशतीषु भवन्तमुपाददे ॥ **40.5** ॥

ललितभावविलासहृतात्मभि -
    र्युवतिभिः प्रतिरोद्धुमपारिता।
स्तनमसौ भवनान्तनिषेदुषी
    प्रददुषी भवते कपटात्मने ॥ **40.6** ॥

समधिरुह्य तदङ्कमशङ्कित -
    स्त्वमथ बालकलोपनरोषितः।
महदिवाम्रफलं कुचमण्डलं
    प्रतिचुचूषिथ दुर्विषदूषितम् ॥ **40.7** ॥

असुभिरेव समं धयति त्वयि
    स्तनमसौ स्तनितोपमनिस्वना।
निरपतद्भयदायि निजं वपुः
    प्रतिगता प्रविसार्य भुजावुभौ ॥ **40.8** ॥

भयदघोषणभीषणविग्रह -
    श्रवणदर्शनमोहितवल्लवे।
व्रजपदे तदुरः स्थलखेलनं
    ननु भवन्तमगृह्णत गोपिकाः ॥ **40.9** ॥

भुवनमङ्गलनामभिरेव ते
    युवतिभिर्बहुधा कृतरक्षणः।
त्वमयि वातनिकेतननाथ मा -
    मगदयन् कुरु तावकसेवकम् ॥ **40.10** ॥

॥ इति श्रीमन्नारायणीये चत्वारिंशं दशकं समाप्तम् ॥